# उशीर

मध्ये सारविहीनाय सरला कीटवर्ज्जिता ।
नलिका सा भवेत् भद्रा विपरीता तु निन्दिता ॥ **(Shi ni)**

Best qualities of Usira are mentioned: Madhaya sara vihinya, Sarala, kita varjita, Nalika, are the good qualities. The rest are to be avoided.

प्राहुरुशीरं वीरणमभयं भद्रश्रियं च वालाख्यम् ।
बहुमूलं लामज्जं सेव्यं समगन्धकं मृणालमिति ॥ **(Aa ma)**

Usiram is also called as Virana, Abhaya, Bhadrasriya, Valakhyam, Bahumula, Lammaja, Sevya, Samagandhaka, Mrnala.

वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यं च समगन्धिकमित्यपि ॥ **(Bpn)**

Mula of Virana is Usira. It is also called as Nalada, Amrnala, Sevya and Samagandhi.

उशीरममृणालं स्याज्जलवासं हरिप्रियम् ।
मृणालमभयं वीरं वीरणं समगन्धिकम् ॥
रणप्रियं वारितरं शिशिरं शितिमूलकम् ।
वेणीगमूलकं चैव जलामोदं सुगन्धिकम् ॥
सुगन्धिमूलकं शुभ्रं बालकं ग्रहभूह्वयम् । **(Rjn)**

Usira, Mrnala, jalavasa, Haripriya, Mrnala, Abhaya, vira, Virana, Samagandhika, Ranapriya, Varitara, Sisira, Sitimulaka, Venigamulaka, Jalamoda, Sugandhika, Sugandhimulaka, Subhra, Balaka, Grahabhuhvaya.

उशीरं वीरणं सेव्यमभयं समगन्धिकम् ।
बहुमूलं वीरतरु वीरं वीरणमूलिका ॥
रणप्रियं शीतमूलममृणालं मृणालकम् । **(Kdn)**

Usira, Virana, Abhaya, Samagandhika, Bahumula, Virataru, Vira, Viranamulika, Ranapriya, Sitamula, Amrnala, Mrnalaka.

ज्वरघ्नं पाचनं दाहतृष्णामदविनाशनम् ।
रक्तपित्तहरं शीतमुशीरं मूत्रकृच्छ्रजित् ॥**(Mdn)**

Usira is Jvaraghna, Daha-Trsna-Mada vinasana, Raktapitta hara, Sita in Potency, Mutra krcchra jit.

उशीरं पाचनं शीतं स्तंभनं लघुतिक्तकम् ।
मधुरं ज्वरहृत् वान्तिमदनुत् कफपित्तहृत् ॥
तृष्णास्त्रविषवीसर्पदाहकृच्छ्रव्रणापहम् । **(Bpn)**

Usira is Pacana, Sita in Potency, Stambhana, Laghu in Guna, Tikta, Madhura in Rasa, Jvara hara, Vanti-Mada hara, Kapha-Pitta hara, cures Trsna, Asra vikara, Visha, Visa, Visarpa, Daha, Krcchra Vrana.

उशीरं शीतलं तिक्तं दाहक्लान्तिहरं च तत् ।
वातघ्नं ज्वरतृण्मेहनुद्रक्तं हन्ति योगतः ॥
उशीरं स्वेदौर्गन्ध्यापित्तघ्नं स्निग्धतिक्तकम् । **(Dhn)**

Usira is Sita in Potency, Tikta in Rasa, Daha-Klanti hara, Vataghna, cures Jvara, Trt, Meha, Sveda, daurgandhya, Pitta and is Snigdha and Tikta.

उशीरं शीतलं तिक्तं दाहश्रमहरं परम् ।
पित्तज्वरवरार्त्तिशमनं जलसौगन्ध्यदायकम् ॥ **(Rjn)**

Usira is Sitala in Potency, Tikta in Rasa, Daha-Srama hara param, Pitta-Jvara arti samana para, Jala saugandhya dayaka.

उशीरं शीतलं रूक्षं स्वादुतिक्तं हिमं लघु ।
पाचनं स्तंभनं हन्ति दोषदाहमदज्वरान् ॥
तृष्णास्रविषदौर्गन्ध्यकृच्छ्रकुष्ठवमिव्रणान् । **(Kdn)**

Usira is Sita in virya, Ruksa, Svadu-Tikta in Rasa, Hima in Potency, Laghu in Guna, Pacana, Stambhana, cures Dosha, daha, Mada, Jvara, Trsna, Asra vikara, Visa, Daurgandhya, Krcchra Kustha, Vami, Vrana.

उशीरं पाचनं शीतं स्तंभनं कफपित्तजित् ।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥ **(Mpn)**

Usira is Pacana, Sita in Potency, Stambhana, Kapha-Pitta hara, cures Trsna, Asra vikara, Visarpa, Daha, Krcchra vrana.

उशीरं स्वेदपित्तास्रदाहदौर्गन्ध्यनाशनम् ।
क्लमतृष्णाविषध्वंसी सतिक्तमधुरं हिमम् ॥ **(Sdn)**

Usira is Sveda-Pitta-Asra-daha-Daurgandhya nasana, Klama-Trsna hara, Tikta, Madhura in Rasa, Hima in Potency.

उशीरं शीतलं तिक्तं विशेषात् पाचनं लघु ।
ज्वरातिसारवमथुरक्तपित्तक्षतापहम् ॥ **(Hr pri)**

Usira is Sita in Potency, Tikta in Rasa, specifically it is Pacana, Laghu in Guna, cures Jvara, Atisara, Vamathi, Raktapitta, Ksata.

उशीरं स्वेददौर्गन्ध्यदाहपित्तास्ररोगजित् । **(Rav)**

Usira is Sveda-daurgandhya-Daha-Pitta-Asra roga hara.